CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा.२०२४

लब्धां०
संस्कृत
२०२४

जयतु संस्कृतम्

प्रकाशकः
वाल्मीकिविद्यापीठच्छात्रसङ्घः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयतु संस्कृतम्

२०२४

वर्षः २ अंकः २ २०४६ फाल्गुणः

विकाशञ्छात्रमनोम्बुजावलीर्
विवोधयन् सुन्दरसंस्कृतावली ।
विनोदयङ्कोविदकोकिलावलो-
रुदेतु षाण्मासिकः सूर्य एषकः ।

सम्पादकः
जनार्दनः घिमिरे

संरक्षकः
डा. माधवः भट्टराई
वाल्मीकिविद्यापीठस्य प्राचार्यः

प्रकाशकः
वाल्मीकिविद्यापीठच्छात्रसङ्घः

मूल्यम्- ५/-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाणां

अनुक्रमः

किम् ?	कस्य ?	कुत्र ?
श्रद्धाञ्जलिः		क
पूर्णप्रस दन्नाह्मणस्यः परिचयः	नवराजः कट्टेलः	१
शङ्कराभिवन्दनम्	माधवः भट्टराई	१०
संस्कृतं राष्ट्रियसंस्कृतेर्मूलम्	ध्रुवभट्टराई	१२
त्रिपुराविमर्शः	स्थानेश्वरः	१८
का संस्कृता संस्कृतिः	लोकनाथ आचार्यः	२०
पूर्णप्रसादं प्रति	मनोजकुमार आचार्यः	२२
मम उद्यानम्	अनन्त आचार्यः	२३
सूर्यादिग्रहाणां यन्त्रनिर्माणविधिः	लक्ष्मीकान्तः पन्थिः	२४
काव्यशास्त्राणां नामकरण परम्परा	जीवन अधिकारी	२५
विद्वन्महिमा	शिवहरिः लामिछाने	३०
टेलिभिजनम्	विष्णुराज 'आत्रेयः'	३२
राज्ञः सुदर्शनस्य कथा	प्रमोदवर्धन कौण्डिन्न्यायनः	३५
सम्पादकीयम्		३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

विंशत्युत्तरद्विसहस्रतमे वैक्रमाब्दे मार्गमासस्य पञ्चदशदिवसे स्वजन्मना धादिङमण्डलान्तर्गतस्य पाल्चोकग्रामपञ्चायतस्य कार्की-डांडाग्राममलङ्कृत्य बाल्यकाले पित्रा सह काष्ठमण्डपमागतोऽस्माकं सुहृद् "अच्युतप्रसादगौतमः" पञ्चचत्वारिंशदुत्तरद्विसहस्रमित वैक्रमाब्दस्य फाल्गुणमास्यष्टमे दिवसे एकस्या मृत्तरयानदुर्घटनायाः प्रभावेण स्वगवासी अभवत् । रानीपोखरी-संस्कृत-माध्यमिक-विद्यालये साहित्यविषयं गृहीत्वा माध्यमिकीं शिक्षां समापयित्वा वाल्मीकिमहाविद्यालये प्रविष्टः श्रीगौतमोऽस्माकं सहयात्री राष्ट्रियता-प्रजातन्त्र-समाजवाद-छात्रैकतादीनां नेपाल-विद्यार्थी सङ्घस्याऽऽदर्शानां पालकः स्वतन्त्रैकप्राणश्चासीत् । अस्य निधनेनास्माकमपूरणीया क्षतिर्जाता । स्वर्गाऽऽरूढस्य तस्याऽऽत्मन-श्चिरं शान्तये ईश्वरं प्रार्थयन् "जयतु संस्कृतम्" पत्रिकामाध्यमेन वाल्मीकिविद्यापीठस्यच्छात्रसङ्घः (स्वतन्त्र-विद्यार्थी-यूनियन-इत्याख्यः) हृदयतः श्रद्धाञ्जलिं प्रकटयति । तरुण एव वयसि स्वर्यातस्य तस्य विद्यावंशस्य नैरन्तर्यं कामयमानेव वरिष्ठ-प्राध्यापकेन तत्पित्रा सिद्धिनाथगौतममहोदयेन महेन्द्र-संस्कृत-विश्वविद्यालयान्तर्गतस्य संस्कृत-माध्यमिक-विद्यालये साहित्य-विषये एकाऽऽच्युतप्रसादगौतमच्छात्रवृत्तिः, त्रिभुवन-विश्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षम्यतां यत्, किञ्चिदस्माकं समयाभावात् किञ्चिन्नेपाल-भारतसम्बन्धेर्गतिरोधोत्पन्नात् पत्रिकाप्रकाशने विलम्बो जातः ।

लेखरचनादानेन सहयोगिभ्यः सर्वेभ्यो विद्वद्भ्यो महोदयेभ्यः सखिभ्यश्च स्वां कृतज्ञतां प्रकटयति सम्पादकोऽयम् । आर्थिक-सहयोगदायको महेन्द्रसंस्कृतविश्वविद्यालयोऽपि धन्यवादार्होऽस्ति । प्रत्यक्षाप्रत्यक्षरूपेण पत्रिकाप्रकाशने सहयोगिनो महानुभावाश्च धन्यवादार्हाः सन्ति ।

"शुद्धाशुद्धिविषये सुधय एव प्रमाणभूताः" इत्यस्मात् समयाभावादनुभवहीनत्वादल्पज्ञानाच्च जाता अशुद्धयोऽपि संस्कृतानुरागिमहोदयैरेव निराकरणीयाः ।

।। किमधिकलेखनेन विद्वद्मद्वर्येषु ।।

जयतु संस्कृतम् !

गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।

– सुभाषित–रत्न–भाण्डागारात्

□ □ □

पङ्को हि नमसि क्षिप्तः क्षेप्तुः पतति मूर्धनि ।।

– कथारित्सागरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा. २०२४

पूर्णप्रसाद ब्राम्हणस्य परिचयः

नवराजः कट्टेलः

नैपालीयैः सुविपुलधियै ज्ञानयुक्तं "प्रसादं"
त्यागोद्भासं सुमृदु-हृदयं क्रान्ति-चेतं विशालम् ।
विद्वांसं वै कविकुलनुतं सूरिकल्पैः स्मरन्तं
स्मारं स्मारं तमहमधुना प्राज्ञ-वीरं स्मरामि ।।

नेपालराष्ट्रस्य गोरखाजनपदस्य हंसपुरग्राम-पञ्चायतकाफले' डाँडानामके ग्रामे १९७६ वैक्रमाब्देऽयं क्रान्तिचेतः पूर्णप्रसाद ब्राह्मणः समजनि । प्राथमिकी शिक्षाऽनेन स्वनिकेतन एव सम्प्राप्ता स्वपितुर्मुखारविन्दात् । स काष्ठमण्डप एव निवसति स्म । पञ्चादनेन संस्कृत-छात्रावासे स्थित्वा रानीपोखरी-संस्कृत-प्रधानपाठशालायां ध्यानयोगपूर्वकं पठित्वा 'क्विन्स कलेजात्' पूर्वमीमांसाचार्य-परीक्षा चोत्तीर्णीकृता । अस्य व्यक्तित्वं द्विधा विभज्य व्याख्यातुं शक्यते – (क) राजनैतिक-व्यक्तित्वम् (ख) साहित्यिक– व्यक्तित्वञ्चेति ।

(क) छात्रजीवनादेवायं राजनीतौ संलग्नो जातः। गान्धीवादादयं प्रभावितः। 'शहीद-काण्डात्' अस्य मनसि क्रान्तिकारी-भावनायाः तीव्रप्रसारो जातः । गुप्त रूपेण १९९७-९८ वैक्रमाब्दे चर्खा-आन्दोलनञ्च सञ्चालयामास इति श्रुतिपथमायाति । आचार्यं – परीक्षा प्रसमाप्तायं' नेपाली-भाषा-प्रकाशिनीसमित्यां लेखकत्वेन, पश्चाद् 'गोरखापत्र' पत्रिकायां सम्पादकत्वेन नियुक्तो जातः। जयतु-संस्कृतम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[२००४] नाम ऐतिहासिकं आन्दोलनमस्यैव नेतृत्वेऽभवत् । मोहन-शमशेरस्य भारदारीसभायां च एनातक प्रतिनिधित्वेन निर्वाचित आसीत् । पश्चादयं २००७ वैक्रमाब्दे, नेपालराष्ट्रे सञ्चालिते राणाशासनपद्धति-निर्मूलनात्मके राष्ट्रिय-संघर्षे च संलग्नः सक्रियश्चाभूत् । प्रजातन्त्रस्य [२००७] स्थापनापश्चात् पूर्णरूपेण राजनीतावेव व्यस्तो जातः।

अग्निप्रसादः खरेलस्याध्यक्षत्वे संघटिते संगठनेऽयं सचिवत्वेन व्यराजि । नेपालस्येतिहासे ख्यातिप्राप्ते 'के०आइ०सिंहकाण्ड' नामके जनविद्रोहे चास्यतीव रहस्यभूता महत्वपूर्णा भूमिकाऽसीदिति श्रुतिपरम्परया कर्णविवरमभिगुञ्जति । २००९ वैक्रमाब्दे किञ्चित्काल पर्यन्तं, भारते निर्वासितं जीवनं यापितम् । ततः धवलहिमालाभिशोभितं, नदनदीनां 'कल्कल' शब्दैरभिगुञ्जितं, झिर्झिरझिर्झिरध्वनि-ध्वनितं, प्रकृत्या सुन्दरं नेपालराष्ट्रं प्रति निवृत्य राजनितावेव संलग्नोऽभाव्ययं ब्राह्मणः ।

२०१२ वैक्रमाब्दे 'राष्ट्रिय जनराज्य परिषद्' नामकं संगठनमस्यैवाध्यक्षत्वे संघटितम् । २०१३-०१४ वैक्रमाब्दे समानान्तर-नेपाली-कांग्रेस, समानान्तर प्रजापरिषद्, समानान्तर-प्रजातन्त्रपार्टी, राष्ट्रिय जनराज्यपरिषद्, च एकीभूय 'जनता पार्टी' नामिका संस्था चाऽस्यैव सक्रियत्वेन जातः । यदा 'नेपाली-कांग्रेस' सत्तारूढो जातः तदा 'गोरखा परिषद्' विपक्षिशक्तिरूपेण विराजितोऽभूत् । इदं परिषद् विपक्षिभूमिकां निर्वहितुं नं प्रावर्तीति विचार्य जनतापार्टी प्रजापरिषद् 'संयुक्त-प्रजातन्त्रपार्टी प्रजातान्त्रिकमहासभा च एकीकृत्य 'प्रजातान्त्रिकमोर्चा' संघटने चायं सशक्तं कार्यमकरोत् ।

२०१७ वैक्रमाब्दे प्रजातान्त्रिक-पद्धत्या उच्छेदनपूर्वकं निर्दलीय-पञ्चायतपद्धत्याः स्थापना जाता । सर्वाश्च राजनैतिक-संस्था विघटिताः । सर्वे राजनेतारो बन्दीकृताः। अस्य राजनीतिरपि निष्क्रिया जाता । अतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चायत-व्यवस्थायाः स्वीकारपश्चात् ०१९ वैक्रमाब्दे राष्ट्रिय-निर्देशन-परिषदि सदस्यसचिवत्वेन, नियुक्तोऽयम् । 'राष्ट्रिय-निर्वाचनायोगे' च प्रमुखनिर्वाचनायुक्तरूपेण ०२८ पर्यन्तं कार्यसम्पादनमकरोदयं ब्राह्मणः।

२०३० पश्चात्-गोमांसविक्री-वितरणस्य विरोधे, क्रिस्चियनधर्म-प्रचारस्य' विरोधेऽप्ययं संलग्नो जातः। राजसभायाः सदस्यपदेऽप्ययं नियुक्त आसीत् ।

अस्य राष्ट्रवादस्य परिचयः "नेपाल-राष्ट्रिय-भावनाविकास-परिषद्" [२०४४] विधाने साहित्यिककृतौ च प्राप्यते । तथैवास्य विश्व-बन्धुत्वस्य भावनायाः, आध्यात्मिक-चिन्तनस्य, विश्वशान्ति-कार्यक्रमस्य च परिदर्शनं 'जयतु-संस्कृतम्' भावनाकार्यान्वयन महासभायाः [२०४२] भूमिकायां, विधाने, 'राजतन्त्रं सदा जीव्यात्' इत्यस्य भूमिकायां च जायते। एषु पुस्तकेष्वयं राष्ट्रिय भावनायाः, विश्वभ्रातृत्वस्य भावनायाः, संस्कृत-वाङ्मयस्य, हिन्दु-धर्मस्य, नेपाली-संस्कृतेश्च प्रचारप्रसारस्योन्नतेश्च कार्यक्रमस्य निदर्शनं करोति ।

०४१-०४२ वैक्रमाब्देऽयं 'समानान्तर – राष्ट्रियपञ्चायत'स्य संघटने प्रायतत । अस्मिन् समय एव गोमांस-विज्ञापनस्य विरोधे द राइजिङ्ग नेपाल' नामाख्यायाः पत्रिकाया अग्निदाहमकरोत् । ०४२ वैक्रमाब्दादवशानपर्यन्तं संस्कृत् छात्रावास-शतवार्षिक-समारोह-समितेर-ध्यक्षपदमलञ्चकार ।

स हृदयरोगेन श्वास-प्रश्वासरोगेण च आक्रान्त आसीत् । व्याधिना ताडितो ब्राह्मणः ६८ वर्षे २०४६ –ज्येष्ठमासस्य ३२ मितौ पञ्चत्वं गतवान् ।

अस्य राजनैतिकं व्यक्तित्वं विवादमूलमेव, न तु सन्तुष्टिप्रदम् । अस्य बौद्धिक व्यक्तित्वं साहित्यिक व्यक्तित्वंतु राजनीतेरपेक्षया निर्विवाद मूलम्·

(१· पूर्ण प्रसादस्य राजनैतिक वृत्त नारायण प्रसादं न्यौपानेतः प्राप्तसूचनामायाधारितम् ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) अस्य कवेः साहित्यिक-योगदानं च द्विधा विभज्य विश्लेषणं कर्तुं शक्यते। (क) संस्कृत-साहित्ये (ख) नेपाली-साहित्ये च सिध्दह-स्तोऽयं बुधः। संस्कृत साहित्येऽस्य लेखनी चञ्चलविद्युत् प्रभेव त्वरितां गतिं वरीवर्ति। अनेन संस्कृतवाङ्मये बहूनि ग्रन्थरत्नानि व्यरचि। तेषां नामानि यथा—

१-सत्य-हरिश्चन्द्रं महाकाव्यम् [२००७]

२-विश्वेदेवाः [२०११] [लघिष्ठः कथाकाव्यसंग्रहः]

३-तदर्थमेव [श्री म०वी०वि०शाहस्य 'उसैको लागि' इति कविता संग्रहस्य अनुवादः-संस्कृते]

४-ईशावास्यवृत्तिः [विनोबामहोदयस्येशावास्यवृत्तेरनुवादःसंस्कृते]

५-राजत-त्वं सदा जीव्यात्-[२०४२] [खण्डकाव्यम्?]

६-रामराज्यम् [खण्डकाव्यम्] २०४६,

७-नागरिकशास्त्रम्[मुद्रणालये गतमस्ति' इत्येव सूचना प्राप्यते न तु पुस्तकम्]

८-'जयतु संस्कृतम्' पत्रिकायां प्रकाशिता रचनाः।

९-संस्कृतच्छात्रावासस्य शतवार्षिकस्तम्भे उट्टङ्कितो गद्यलेखः।

अप्रकाशितकृतयः

१-श्रीकृष्ण-श्रीदामा [उपन्यासः] [महेन्द्र संस्कृत विश्वविद्यालये प्रकाशनार्थं प्रेषितम्]

२-अमेरिकायाः इतिहासः

मीमांसाचार्योऽयं कर्मवादित्वेन, राष्ट्रिय भावनायाः विश्वबन्धुत्व भावनायां हिन्दुधर्मसंस्कृतेश्च परिपोषकत्वेन विभाजते संस्कृतसाहित्य-जगति। अस्य क्रान्ति-चेतनाया बीजं 'जयतु संस्कृतम्' नामात्मकमान्दोल-नमेवेति प्रतिभाति / यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयतु संस्कृतं धर्मभूतये
जयतु संस्कृतं राजभूतये
जयतु संस्कृतं देशभूतये
जयतु संस्कृतं विश्वभूतये ।

इत्युद्घोषणमुद्घोषितमासीत् । अस्यैव प्रभावो दरीदृश्यते ब्राह्मणे ।

अस्य प्रकाशितासु कृतिषु सत्यहरिश्चन्द्र-महाकाव्यं सर्वोत्कृष्टं विद्यत इति कविकोविदकुलैः स्वीक्रियते । अस्य महत् काव्यस्य चिकीर्षाविषये कविः कथयति भूमिकायामित्थम् — 'यदिदमहं लेखितवान् न गर्वाय, न स्वल्पविद्वत्तादर्शनाय, न कस्यचित् शक्तिविशेषस्य तोषणाय, न धनाय अपितु केवलं सत्यप्रेरणया सत्यदेव प्रसादाय, जनतात्मने तस्मै एव समर्पणाय" इति । अस्य कविकुलप्रसादन-शीलस्य महाकाव्यस्य सोमनाथ-रामनाथहरिचरणवर्मणादिभिश्च विहिता मुक्तकण्ठेन प्रशंसा । सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य हरिचरणवर्मा आभणति स्वाशयं यथा—"अर्वाक् पञ्चवर्षशतेभ्यो यन्न भारतेऽपि समुद्भूतम् , . ." इति ।

सदा सर्वदाऽयं कविविश्वबन्धुत्वभावनामयीं स्वहृदयीभूतां निर्झरझर्झर इव विचार-शरणीमाभिलिखति स्म । समाजे, राष्ट्रे, विश्व-समुदाये च विश्व भ्रातृत्वमयं भावमेवोद्घोषयति । यथा—

"सङ्कीर्णं स्वार्थकूपे मां मग्नं दीनं समुद्धरन्।
विशाले विश्वबन्धुत्वे नय सत्य! यथाद्रुवम् ।"

पुराणप्रसिद्धां सत्यहरिश्चन्द्रकथामनुसृत्यानेन सत्यं, प्रभावोत्पादकं विचारभावनयोः सन्तुलनात्मकं, काव्यरसपाननिपुणविद्वद्धौरेयमण्डलैरभिरुचितं प्रशंसितञ्च 'सत्यहरिश्चन्द्रमहाकाव्यं ग्रन्थरत्नं व्यलिखि यत्र तत्कालिक-नेपाल-राष्ट्रस्य राणाशासनपद्धतेः, नेपालीसमाजस्य च निदर्शनं भवति । कमनीयकविताकामिनीभिः, सुललितासिरुपदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शात्मिकाभिः सूक्तिभिरभिभूषितमिदं काव्यम् । अनुकरणात्मकाभि नेपालीशब्दशरणीभिः, नवनिर्मितशब्दैः, पदलालित्यैः, गीतोपनिषद्वाक्यैः, संगीतात्मकैः पद्यमयैः श्लोकैः, संवादीकृत-नाटकीकृत-विशेषतादिभिश्च विभूषितमिदं महाकाव्यम् । शैल्या-कालिदास इव प्रतिभाति कविः । अस्य कवित्वस्य निदर्शनं यथाः-

"प्रातः प्राच्या उदक-कनकद्वारमुद्घाट्य देवी
स्वास्वर्णोषाकिरणपथतो मन्दगत्यावतीर्य ।
स्नातुं गांङ्ग सलिलमविशत्, तत्स्मितं व्यापतोयम्
केशाश्चाऽस्याः कनकरुचिरा वीचिदृश्या अनृत्यन् ।।१०-२।।

नेपालीभाषाया, अनुकरणात्मकैः शब्दैरुद्भासितं पदलालित्यं कवित्वञ्च यथा

"कल्कल् कल्कल् स्वनति मधुरं जाह्नवीयो जलौघः ।।(१०-१)
"तीरोद्यानात् सिरिरिति वहन् शीतलश्चुत वातः"(१०-३)

स्थलेषु मर्मर् सलिलेषु कल्कल्
वृक्षेषु छर्छर् पटलेषु बर्बर् ।
इति स्वनन्ती घननीरधारा
पपात दन्तावलहस्त भीमा ।।(४-३२)

सूक्तिमयानि पद्यानि यथा

'धर्मार्थकामाः समभेव सेव्याः' (१-१३)
'सह्यो हि मृत्युनं चिराय कष्टम्' (६-३)
'जीवन् नरो भद्रशतानि पश्येत्' (४-२२)

गीतोपनिषदादिग्रन्थानां सुप्रयुक्तानि वाक्यानि यथा-

"कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन ।" (१३-९२)
'ईशावास्यमिदं सर्वम्' वसुधैव कुटुम्बकम्' (१३-११०)

ऋतु-वर्णनप्रसङ्गे यत्र तत्रायं निरङ्कुशराणा शासनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रति प्रहारिति व्यंग्यशरम् यथा-
भूमिश्च तप्ता हरितश्च तप्ताः
अन्तर्बहिस्तत् समभेव तप्तम् ।
ग्रीष्मेना वर्त्मनि घर्मतप्ते
निरंकुशं राजनयं स्मरन्ति ॥(९-९)
निरङ्कुशं शासनमेकतन्त्रम्
प्राप्येवको वाऽस्ति तदा ह्यदूनः ॥ (१२-६)

अतोऽस्य कवेः महाकाव्यं सुन्दरं सुलक्षितं मनोहरं, विचारोत्तेजकं (युगसापेक्षभावसमन्वितम्) पठनीयञ्चास्ति । विचारे गम्भीरता, भाषायां सुष्पष्टता, प्राञ्जलता; शैल्यसरलता; काव्यसंयोजने चतुरता काव्यसिद्धानुकूलता प्रकृति-वर्णने सूक्ष्मता, व्यङ्ग्यात्मकता-(नेपालीजन-जीवनस्य राणाशासनपद्धतेश्च चित्रणे यथार्थता) चास्यकवेर्विशेषता महनीयता च ।

नेपालीसाहित्ये चानेन कविताकथोपन्यासादिग्रन्थरत्नानि विरचितानीति । तेषु ग्रन्थेष्वपि स राष्ट्र-परिपोषकं भावमेव व्यनक्ति । अन्धपरम्परा-दीन- दरिद्रता-दासताद्युन्मूलनोन्मुखं, विद्रोह विप्लवादिसूचकमोजमयं, क्रान्तिबीजभूतं भावं वरीवर्ति स स्वरचनायाम् । रूपयौवनसम्पन्नानां गौरसुमृदु-मञ्जुल चञ्चलवपुषानां षोढानां नरोचते तस्मै । नरवशिख वर्णनम्। हिन्दुत्वस्य संरक्षणार्थं महिलाजातीनां संरक्षणार्थं सम्मानार्थं च सञ्चलति तस्य प्रभावोत्पादिका वेणवती लेखनी। पद्यमयी भाषा तस्य यादृशी शक्तिशालिनी विद्यते तथैव तस्य गद्यमयी भाषाऽपि पूर्णतामावहति, सरलसुन्दरमञ्जुलतां च वर्वर्ति । 'जयनुसंस्कृतम्' (२००४) आन्दोलनसमये तस्य वीरोत्सर्गभावमयी कविता ग्रामे ग्रामे जने जने च प्रापिता आसीत् । परिवर्तनकामास्ते वीरयोद्धारश्छात्रवटवस्तां वीरभावजागरणात्मिकामोजमयीं कवितामुच्चैरुच्चैरुद्घोष्य सुषुप्तान् नेपालीयान् जनानुद्बोधयन्ति स्म । ते शिक्षायातायात-जनजागरण-विकासरहितां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राणशासनपद्धतिं धूलिसात् कर्तुं भूमिसात् विदधातुं कविताशरैः संग्राम क्षेत्रे निःसरन्ति स्मेति कर्णपथमायाति । यथा तस्य बीरभाव-नामयी कविता (निदर्शनार्थम्)

"दड्दड्ड भूइ कपाउँदै कदमले खोला त्यसै फट्कदै
फोर्दै पत्थर लात्तिले, कुहिनुले पहाड चर्क्याउँदै ।
गर्जेले वनभागेका सयकडौं ती वृक्ष सोत्र्याउँदै
जंगी शान लि घेर कान्तिपुर यो हे वीर नारा दिदै ।।
देख्तै नर्क परिन्छ, मूर्ति यिनका फोरौं सबै सालिक
तोडौं शासन हामीमाथि नबनून् फेरी यिनै मालिक ।

नेपाली-भाषायां तस्य प्रकाशिताः कृतयः

१- अगुल्टो (कविता संग्रह)
२- कुन्तिको समाचार (खण्डकाव्यम्)
३- एक कथा (उपन्यास)
४- एघार कथा (कथा संग्रह)
५- एक्काइस कथा (,,)
६- एकतीस कथा (,,)
७- झिल्को (,,)
८- म लेख्ने हूँ (लघुकथासंग्रह)
९- हिन्दुत्व जिज्ञासा (लघुपुस्तिका)
१०- संस्कृति संघर्षको आवश्यकता (लघु पुस्तिका)
११- स्फुटलेखाः (विभिन्नासु पत्रिकासु प्रकाशिताः)
१२-स्फुट-कविताः (विभिन्नासु पत्रिकासु प्रकाशिताः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रकाशितकृतिः

राजा पुरञ्जन (उपन्यासः)

नेपालीसाहित्येऽनेनेत्थं प्रकारेण गद्ये पद्ये च महनीयानि ग्रन्थरत्नानि प्रदत्तानि। पद्यसाहित्ये 'अगुल्टो' 'कुन्तिको समाचार' नामाख्ये काव्यग्रन्थे उपलब्धि-पूर्णे स्तः। गद्यसाहित्ये 'एघारकथा' 'एक्काइस' कथा 'एकतीस कथा' नामाख्यानि पुस्तिकानि महत्वपूर्णानि विद्यन्त इत्यनुभूयते।

पूर्णप्रसादब्राह्मणस्य बहुमुखिव्यक्तित्वस्य परिशीलनं न परिपूर्णसर्वाङ्गीभूतं भवत्यस्मिन् लघुकायलेखे। राजनैतिकजीवनयात्रायां संस्कृतस्य संस्कृतसाहित्यस्य, नेपालीजातेः जनजीवनस्य, नेपालीसाहित्यस्य समुत्थाने चानेन यादृशी भूमिका निर्वहिता तस्या सविस्तारवर्णनं बृहदाकारेऽनुसन्धानात्मके ग्रन्थे एव शक्यते। अत एवास्य त्यागपूर्ण, सेवाभावमूलकं व्यक्तित्वं, साहित्यिकयोगदानं प्रति च कृतज्ञतां समादरतां सद्भावं च दर्शयितुं प्रकटयितुं वा प्रज्ञाभवने, मृगस्थलिगोरक्षपीठे, वाल्मीकिविद्यापीठे संस्कृतछात्रावासेच श्रद्धाञ्जलिसभाः समायोजिता आसन्। अनुसन्धानकर्तृभ्यो विद्वद्भ्यः तस्य व्यक्तित्वस्य सर्वाङ्गपरिपूर्णगवेषणात्मकं परिशीलनं अविष्यतीत्यहमाशासे। अन्ते श्रद्धाञ्जलि पद्येप्रस्तुत्य विरमामिः-

'विश्वेदेवा' सुहृद-हृदयाः 'राजतन्त्रं' तदर्थं
मेवेत्यादिः सुगुण-गुणितं यद्धरिश्चन्द्रकाव्यम्।
श्रीदामाश्रीपति-सुचरितं, 'रामराज्यं' सुकाव्यं
नेपाल्यां यो बहुलवृतयश्चाऽलिरद्राष्ट्रभूत्यै॥
नेपाले वै प्रकृति-रुचिरे हैमवत्या निनादे
शुभ्रे शैले धवलनभगे वर्धितुं राष्ट्र-भूतिम्।
साहित्ये च प्रलगति सदा राजनीतौ सुकार्ये
पौनः पुन्यं स्मृतिसुकुसुमं ह्यर्पयामीह तस्मै॥

जयतु संस्कृतम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्कराभिवन्दनम्

डा० माधव भट्टराई

१. आभातीह हिमालयो गिरिवरः शान्ताकृतिर्निश्चलो
नेपालावनिरक्षको मणिमयः सर्वोन्नतः शाश्वतः ।
स्रोतांस्यत्र समुद्भवन्ति सरितां, शास्त्राणि वेदाद् यथा
शान्तिक्षेत्रमिदं व्यनक्ति मुदितं सुस्वागतं श्रीमताम् ।।

२. धर्मोद्धारक-वीर-भूपतिवरैः संपालितं पूजितं
नानगौरवमण्डितं श्रुतिपथे ख्यातं नितान्तं भुवि ।
धर्माचारविचारसारचतुरान् दृष्ट्वा सतः श्रीमतो
हिन्दुराज्यमिदं व्यनक्ति मुदितं सुस्वातंग श्रीमताम् ।।

३. नित्यं भूतरतिः स्वयं पशुपतिर्यत्रैव विद्योतते
मुक्तिक्षेत्रमिहैव लोकजननी गुह्येश्वरी राजते ।
शील-ज्ञान-दयावतां प्रभवतां संख्यावतां श्रीमतां
पुण्यक्षेत्रमिदं व्यनक्ति सततं सुस्वागतं स्वागतम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. धर्मस्थापन-मार्गदर्शनविधौ दत्ताशयाः सर्वदा
श्रीज्योतिर्मठ-शारदामठयुगाधीशा भवन्तोऽधुना ।
सम्प्राप्ता इह,दर्शनेन भवतां मोदान्विताः स्मो वयं
विद्यापीठजनाः प्रणम्य भवतो धन्यान् निजान् मन्महे ।।

५. प्राचीनार्षपरम्परा विलसिता यस्यां जगद्विश्रुता
तां वाग्धेनुमुपासतेऽत्र कुशलाः श्रीशारदासेवकाः ।
नेपाले सुरभारतीप्रणयिनां केन्द्रं बुधैर्वन्दितं
विद्यापीठमिदं व्यनक्ति मुदितं सुस्वागतं श्रीमताम् ।।

६. सुरवाणी-सदाचार-धर्मसंरक्षणव्रतान् ।
श्रीशङ्कराचार्यगुरून् विश्ववन्द्यान् वयं नुमः ।।

७. स्वरूपानन्दमहितान् स्वरूपानन्दसंज्ञकान् ।
स्वरूपं दर्शितवतः सतो वन्दामहे वयम् ।।

(२०४४।१२।२१ दिनाङ्के वाल्मीकिविद्यापीठे निमन्त्रितानां ज्योतिर्मठ-शारदामठाधीशानामनन्तश्रीविभूषितजगद्गुरुशङ्कराचार्याणां स्वरूपानन्दसरस्वतीमहाभागानां सम्माने प्रस्तुतं स्वागताभिनन्दनदलम् ।) -संपादकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतं राष्ट्रियसंस्कृतेर्मूलम्

– ध्रुवभट्टराई
वाल्मीकिविद्यापीठम्

यस्य कस्यापि राष्ट्रस्य वास्तविकः परिचयस्तदैव भवति यदा स स्वस्य काञ्चन मौलिकतां किञ्चन वैशिष्ट्यं चान्यान् दर्शयितुं समर्थो भवति। ये पदार्था यानि वस्तूनि या विशेषताश्चान्येषु देशेषु न भवन्ति त एव राष्ट्रस्य सम्यक् परिचायका भवन्ति। कानिचन वैशिष्ट्यानि काश्चन विशेषतास्तु सर्वेषु राष्ट्रेषु भवन्ति। परं ते तस्याधिकगौरववर्धनायाऽत्यन्तमेवोपयोगिनो भवितुं न शक्नुवन्ति। अद्यापि वयं पश्यामो यत् केचन देशाः स्वधर्मरक्षया, केचन स्वकलाया विकासेन, अन्ये स्वदर्शनेनापरे च स्वसभ्यताया विस्तारेण यथास्वं स्थानं बिभ्रति। इस्लामिका देशा दृढतया स्वधर्मस्य परिपालनेन विश्वेऽस्मिन् सर्वत्र परिचिताः सन्ति। तथैव स्वसंस्कृतेः प्रसारेणापि केचन देशा अधुना ख्यातिभाजो विलोक्यन्ते। सिन्धु-मोहन्जोदडो-मेसोपोटामिया-ग्रीस-रोमसभ्यता अधुनापि प्राचीनानां मानवजातीनां प्रामाणिकमितिहासं सन्दर्शयन्ति। सर्वेषां कृते स्वधर्म-संस्कृति-सभ्यताश्चात्यन्तं प्रिया भवन्ति। सभ्यता यथा मानवान् विकासशिखरं समारोहयति तथा संस्कृतिस्तेषां प्राचीनान् व्यवहारान् परिणतीश्च प्रदर्शयति।

संस्कृतिः खलु सर्वस्यापि समाजस्य राष्ट्रस्य चात्मरूपा भवति। अस्माकं हिन्दुसंस्कृतेराधाररूपा देववाणी विराजते। अस्याः प्रतिपादका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यीख्यातारश्च ग्रन्थाः संस्कृतभाषायामेव वर्तन्ते । अस्माकमष्टचत्वारिंशतः संस्काराणां सम्यक् प्रतिपादनं चास्यामेव भाषायां विद्यते । वयमस्माकं सर्वप्राचीनं ग्रन्थं ऋग्वेदं श्रद्धया पूजयामः । सोऽपि संस्कृतभाषायामेव राजते । उपनिषदः, गीता, पुराणानि, रामायणं, महाभारतं चान्ये हिन्दुसंस्कृतिप्रतिपादका ग्रन्थाश्च संस्कृतवाण्यामेव लिखिताः सन्ति हिन्दुसंस्कृतेरस्माकं राष्ट्रियसंस्कृतित्वेन तस्याश्च पृथिवीव सर्वप्राणिनां संस्कृतवाणीमूलं प्रतिभाति । यया विना राष्ट्रियसंस्कृतिरेव निराधारा भवेत् ।

हिन्दुसंस्कृतेर्जनयित्री तद्धर्मस्य च प्रतिपादयित्रीयं भाषा सर्वप्राचीना सर्वश्रेष्ठा सर्वैर्मननीया मननीया वन्दनीया च वर्तते । देवता अपि अस्यामेव भाषायां व्यवहरन्तीति वयं विश्वसिमः । अस्माकं संस्कृतिरेव देवानामुपासिका । तेन देवभाषा अस्या मूल स्वतः सिद्धमेव । संस्कृतन विनेयं संस्कृतिर्निराधारा जायते । यदा संस्कृतं न भवति तदा हिन्दुसंस्कृत्या विकासविस्तारौ कथं भवतः ? एतदेव विचार्य स्वर्गीयाः पञ्चश्रीकाः प्राणायमानहिन्दुसंस्कृतयो महेन्द्र-वीर विक्रम-शाहदेवा इत्थमकथयन्– "संस्कृतभाषाया ज्ञानेन विना वयमस्माकमाचारविचारयोर्मर्मापि न जानीम" इति ।

संस्कृतं न भवेत् चेत्तदा हिन्दुसंस्कृत्यास्तद्धर्मसभ्यतयोश्चास्तित्वं तिरोभवति । सत्यमेवोक्तं नेपालपालैः पञ्चश्रीकैर्महाराजाधिराजैर्वीरेन्द्रवीर विक्रम शाहदेवैर्यथा–"अस्माकं धर्मस्य लोपो भवति चेदस्माकं संस्कृतिर्लुप्यते; अस्माकं संस्कृतेर्लोपो भवति चेत् तदास्माकं सभ्यताया मूलमेव विनश्यति" इति ।

संस्कृत्याः किं स्वरूपम् सा च कथं व्यवह्रियते इति जिज्ञासायामित्थं विवक्षति मे चेतः । मानवजीवनस्य सर्वथा समुन्नतये प्रेरणपरायणा ये चिरस्थायिनो धर्मदर्शनाचारव्यवहाररूपाः क्रियाकलापाः सन्ति तेषां मानवहृदये प्रतिफलप्रकाशः संस्कृतिरिति । अन्येषु शब्देषु इत्थमपि कथयितुं शक्यते यत् पूर्वं देवैः पश्चाद् मानवैश्च सम्पाद्यमानानि धर्मनीतिप्रेरिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नि यानि सुकार्याणि आसन् तेषामेव समष्टिस्वरूपमद्याप्यनुश्रियते; सा संस्कृतिरिति ।

संस्कृतभाषा न केवलं संस्कृतेः अपितु दर्शन-साहित्य-ज्यौतिष-आयुर्वेद-कर्मकाण्ड-तन्त्र नीतिशास्त्र-नाट्यशास्त्र--अर्थशास्त्र -- अश्वशास्त्र हस्तिशास्त्र--वार्तशास्त्र--कामशास्त्रादीनामपि मूलं वर्तते । सा च सकलानां कलानामुत्पादयित्री, अखिलानां विद्यानां प्रतिपादयित्री । अनेन महत्त्वेन पाश्चात्या विद्वांसोऽपि संस्कृतं प्रशसन्ति । संस्कृते महाकविना कालिदासेन निबद्धमेकं शाकुन्तलाख्यं नाटकमात्रमधीतवतो महाकवेर्गटेमहोदयस्याधस्तना भणितिः सस्कृतवाङ्मयसागरे निमग्नैः किं किं नासादयतेति सुस्पष्टमनुमापयति, यथा--'ऐश्वर्यं यदि वाञ्छसि प्रियसखे! शाकुन्तल सेव्यताम्' इति । यद्येकस्मिन् ग्रन्थे तस्य ईदृशो मोहोऽस्ति चेत् ततः परं सकलस्य वाङ्मयस्य तु वार्तैव का ?

संस्कृतपठनेन जनाः संस्कृतिप्रियास्तु भवन्त्येव । ततश्च नीतिनिपुणः, विद्याप्रवीणा; मर्यादापालकाः, अनुशासनपालकाश्चरित्रवन्तश्च भवन्ति । संस्कृतवाङ्मायाः प्रसादेन ते देवभक्ताः, देशभक्ताः, राजभक्ताश्च दृश्यन्ते । अपरा का भाषा वर्तते यया ईदृशी संस्कृतिः, ईदृशानि वैशिष्ट्यानि ईदृशाश्च गुणाः प्रकटीभवेयुः, अन्येषां प्रशसां च प्राप्नुयुः ?

धर्मस्य रक्षणे, संस्कृत्याः परिपालने, सभ्यतायाश्च विकासे विस्तारे चैकस्यैव जनस्य प्रयासः पर्याप्तो न भवति । एतेषां समुन्नतिः स्वल्पियसा कालेन न जायते । सर्वेषां सहयोगं, सर्वेषां प्रयासः, समयश्चाधिकं आवश्यकः। स्वधर्मं संस्कृति-सभ्यतानां रक्षणं तु सर्वेषां प्रथमं कर्तव्यम् । परन्तु अधुना अस्माकं समाजः कां दिशमुद्दीश्य प्रतिष्ठमानो वर्तते इति सर्वे चिन्ताकुलाः सन्ति । स्वधर्मं परित्यज्य, स्वसंस्कृतिमविगणय्य पाश्चात्यदेशीयान् किञ्चिदनधर्मप्रभावितान् व्यवहारान् अवलम्ब्य ये जनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतं तिरस्कुर्वन्ति संस्कृतिं च परिहरन्ति तेभ्योऽनयो रक्षा कथं भवेदिति संस्कृत-संस्कृति-धर्मप्रेमिणां मनसि सदैव व्यथा प्रथते। अधुना ते ईदृशाः संस्कृत-संस्कृति संस्कारहीनाः सन्ति चेत्तेषां सन्ततयः कीदृश्यो भवेयुः?

संस्कृतं तु जनान् विधर्मिभ्यो संरक्ष्य स्वधर्मं प्रति चालयति। संस्कृतिस्तान् सन्मार्गं सन्दर्शयति। संस्काराश्च धर्महीनान् अनैतिकान् सच्चरित्रतां प्रति प्रेरयन्ति। एतानि वस्तूनि यत्किमपि कर्तुं बलं प्रददति भगवन्तौ श्रीरामश्रीकृष्णौ धर्मसंस्कृतिसभ्यतामर्यादानां संरक्षणादेव समस्तैर्लोकैः पूजार्हौ सञ्जातौ। परं वयं तेषां पवित्राणि चरितानि केभ्यश्चित् जनेभ्यः श्रुत्वैव दृढं न विश्वसिमः। ग्रन्थेषु लिखितानि तेषां महात्मनां चरितानि पठित्वैवास्माकं विश्वासो प्रवर्धते। ते च ग्रन्थाः संस्कृतवाण्यामेव सन्ति। संस्कृतवाणीं विहाय न कास्वपि अन्यासु भाषासु हिन्दुसंस्कृतिः स्वस्वरूपं दर्शयति। एतावता संस्कृतमेवास्माकं राष्ट्रियसंस्कृत्या मूलमात्मभूतं प्राणभूतमिवानुभूयते।

हिन्दुसंस्कृतिप्रतिपादकानां शास्त्राणां वचांसि अस्मान् सदैव सत्कर्मकरणे प्रेरयन्ति। वेदो वक्ति—'तन्मे मनः शिवसङ्कल्पमस्तु।' उपनिषत् उद्घोषयति—'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।' दर्शनं दर्शयति—'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।' पुराणानि च प्रस्तुवन्ति-यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति॥'

एतेषां सर्वेषां सारमेव हिन्दुसंस्कृतिर्वर्तते। तस्याश्च प्रतिपादयित्री, विस्तारयित्री व्याख्यात्री च भाषा संस्कृतमेव। तत्कथं संस्कृतं न भवेत् राष्ट्रियसंस्कृत्या मूलम्?

विश्वेऽस्मिन् एकमेव "हिन्दुराष्ट्रम्" इति नाम्ना प्रसिद्धेऽस्माकं देशे तु हिन्दुसंस्कृत्याः प्राणभूतस्य 'आधाररूपस्य च संस्कृतस्य किं महत्त्वमिति वर्णनातीतो विषयः। ये हिन्दुत्वस्य रक्षणे प्रयासं कुर्वन्ति तैः प्रथमं

Nepal Sanskrit University, Balmeek Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतस्य संरक्षणं कर्तव्यम् । संस्कृतस्य संरक्षणेन विना हिन्दुत्वस्य भाषा न, राष्ट्रस्यापि अस्तित्वं दीर्घकालपर्यन्तं बलवत् भवति । हिन्दुसंस्कृतस्य बीजभूतं संस्कृतमस्माकं राष्ट्रं संरक्ष्य धर्मस्य, दर्शनस्य, कलायाः सभ्यतायाश्च विकासपथेऽग्रेसरति । अत्रास्माकं देशे यानि मौलिकानि वस्तूनि सन्ति तेषां मौलिकताया मूले संस्कृतमेव सञ्चकास्ति । देवमूर्तिषु मन्दिरेषु लिच्छविमल्लशाहकाले निर्मितेषु भवनेष्वपि या कला दृश्यते तस्याः प्रेरणापि संस्कृतादेव भवति । ताः कला अपि अस्माकं संस्कृतिं वर्द्धयन्ति चेत्तासां मूलं संस्कृतं कथं न भवितुं शक्नुयात् ?

अधुना नेपाले संस्कृतस्य संस्कृतेश्च संरक्षणाय यानि कार्याणि क्रियमाणानि सन्ति तानि पर्याप्तानि न वर्तन्ते । किञ्चिन्न्यूनं तु एकमपि कार्यं संस्कृतसंस्कृतिरक्षणे नाभूदिति नातिशयोक्तिः । परमधुना ये प्रयासाः सन्ति ते प्रशंसां लभमाना विद्यन्ते । नेपालभूपालैः पञ्चश्रीकैर्महाराजाधिराजैः राजगुरुहिष्या अध्यक्षतायां पशुपतिक्षेत्र-विकास-कोषः संस्थापितः । अनेन हिन्दुधर्मस्य संस्कृतेश्च विकासविस्तारौ सम्यक् भविष्यत इति निश्चयपूर्वं कथयितुं शक्यते । अनेन सर्वेषां हिन्दूनामाशा प्रवर्धमाना जाज्वल्यमानेव प्रतिभाति । तथैव हिन्दुसम्राजः पञ्चश्रीका महाराजाधिराजा वीरेन्द्र-वीर-विक्रमशाहदेवाः स्वराष्ट्रं नेपालं संस्कृतविद्यायां विशिष्टकेन्द्रत्वेन विकासयितुं समीहमाना महेन्द्र-संस्कृत-विश्वविद्यालयस्य स्थापनां कृत्वा तस्य गरीमामयं कुलपतिपदञ्चालङ्कुर्वन्ति । एतेन महता कार्येण संस्कृत-संस्कृति-धर्मदर्शनानां निखिलानां विद्यानां च भविष्यदुज्ज्वलतमं दरीदृश्यते । महेन्द्र-संस्कृत-विश्वविद्यालयस्य समुद्घाटनावसरे संस्थापकैः कुलपतिभिः पञ्चश्रीकैर्महाराजाधिराजैरुक्ता—"अस्माकं धर्मस्य, दर्शनस्य, संस्कृतेश्चामूल्यज्ञानभाण्डागारभूतस्य संस्कृतवाङ्मयस्यास्मदावाश्यकतानुसारमुपयोगे प्रवर्धने च महेन्द्रसंस्कृत-विश्वविद्यालयस्य गतिशीला भूमिका जायताम्" इति या अमराजरा प्रकाशरूपा सन्मार्ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शिका महावाणी विराजते सा सर्वान् संस्कृतसंस्कृति-संस्कारधर्मप्रेमिणः संस्कृतं प्रति अधिकं प्रेरयति। राजमहिष्या या हिन्दुधर्मसेवा-समन्वय-समितिः संगठिता सापि हिन्दुसंस्कृत्या विकासे महद्योगदानं दास्यतीति सर्वेषां दृढतयोऽटलश्च विश्वासः।

यैः सर्वैः किं स्फुटीभवति यदस्माकं राष्ट्रस्य संरक्षणे, राष्ट्रिय-संस्कृतिरूपाया हिन्दुसंस्कृतेश्च प्रतिपादने, व्याख्यायां विकासे, प्रसारे, विस्तारे च एकैव संस्कृतभाषा संराजते। आचारविचाराणामष्टचत्वारिंशतः संस्काराणामाध्यात्मिकदर्शनप्रतिपादकशास्त्राणामस्माभिः क्रियमाणानां देवपूजनादिदैनिकसत्कार्याणां सारसमन्वय एवास्माकं राष्ट्रियसंस्कृतिर्वर्तते यस्या भाषा संस्कृतमेव। ततश्च संस्कृतं राष्ट्रियसंस्कृतेर्भूतमेकमात्रं भूतमस्तित्वं च वरीवर्ति।

(२०४५ वैक्रमाब्दे समायोजितायां प्रा० मुकुन्दनाथभट्टराईसंस्कृत-निबन्धप्रतियोगितायां द्वितीयं स्थानं लब्धवानासीन्निबन्धोऽयम् सम्पादकः)

न मृत्यवेऽवतस्थे कदाचन। — ऋग्वेद।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिपुराविमर्शः

-स्थानेश्वरः

"त्रिमूर्तिसर्गाच्च पुराभवत्वात्, क्षयीमयत्वाच्च पुरैव देव्या। लये त्रिलोक्या अपि पूरकत्वात्, प्रायोऽस्त्रिकायास्त्रिपुरेति नाम इति" त्रिपुराव्युत्पत्तिः। गौडपादैर्यसूत्रमापि "तत्त्वत्रयेणा त्मिदा" इति निर्देशयति। तान्त्रिकसम्प्रदाये कौलसम्प्रदायः, समयीमतम्, त्रिकदर्शनञ्च प्राधान्यं धत्ते तत्र च कालीपासकः कौलसम्प्रदायः परमतत्त्वं विश्वमयमिति विश्लेषयति। "परं तत्त्वातीतम्" इति समयीमतं परमतत्त्वस्य विश्वातीतत्वं निर्देशयति। त्रिकदर्शनं तु परमतत्त्वस्य विश्वातीतत्वेऽपि विमर्शस्य अन्तर्लीनबहिरुन्मुखविभागेन विश्वमयत्वं निष्पादयति। अस्य एव कुल-अकुल-कुलाकुलपदेन निर्देशनम्। सा च त्रिपुरा इच्छाज्ञानक्रियामयत्रिलोकजननीतिसृभ्योऽवस्थाभ्योऽतीतरूपा। अत्र "भेद-अभेद-भेदाभेदवञ्चुकानां निर्मोकादेव त्रैपुरपदावाप्तिः।

इच्छाशक्तिर्महं त्रिपुरसुन्दरीति भावनोपनिषदि इच्छाशक्त्याः समष्टिमयत्वं निरूपितम्। प्रकाशविमर्शयोः कलनायामिच्छायाः आवश्यकत्वात् त्रिपुरातत्त्वस्य निरूपाधिकस्य इच्छात्वेनाऽभिधानम्। अत एव शाक्तदर्शने स्वातन्त्र्यक्षमा शक्तिमयी सर्वाद्या चित्कला। अस्या एव त्रिपुरोपनिषदि "तिस्रः पुरस्त्रिपथा विश्वचर्षणा, अत्राऽकथा अक्षराः सन्निविष्टा। अधिष्ठायैका अजरा पुराणी, महत्तरा महिमा देवतानामिति मन्त्रेण निदर्शनम्। अथरत्नावल्याम् "त्रिशक्तित्रिचक्रत्रिधामत्रिबीजत्रितत्त्वत्रिगुणत्रिकोणादिभेदत्रयाविर्भावेण त्रिवृत्करण रचन वैचित्रीचतुरा त्रैविध्येन सकलस्ताद्व्यापिनी त्रिपुरा" इति विशदरूपेण तस्य निर्वचनं दृश्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा च त्रिपुरा वाग्भव-कामराज-शक्तिकूटेन कादि-हादि-सादिविद्यया स्वस्वरूपं धारयति । अत एव त्रैपुरोपासनायां प्रथमत्रिकोणे "कामेश्वरी-वज्रेश्वरी-भगमालिनीरूपेण कूटत्रयाणां सन्निवेशो विधीयते । कूटत्रैविध्यस्य क्रमदर्शनानुसारेण सृष्टि-स्थिति-संहार-अनाख्या-भासाऽवस्थाभेदेन पञ्चदशतिथयः पञ्चदशनित्यारूपेणाविर्भवन्ति क्रमोदये, सा तु त्रिपथाऽतीता षोडशी महानित्या त्रिपुरापदाभिमानिनी कूटतत्स्थरूपेण सर्वत्र वर्तते, स्वतन्त्रा च वर्तते, न कुत्राऽपि अस्ति, न च कुत्राऽपि नास्ति ।

अनुत्तरानन्देच्छा समष्टित्रपुस्त्रिकोणाकार ऐकार एव वाग्भवरूपेण विस्तीर्य वाग्भवकूटं दधाति, वाग्भवश्च सरस्वतीस्वरूपः । शक्तिस्वरूपस्य कामराजस्वरूपस्य च महालक्ष्म्यां महाकाल्यां चान्तर्भावात् सम्प्रदायभेदेन त्रिकोणरूपे सर्वसिद्धिप्रदचक्रे महाकाली-महालक्ष्मी-महासरस्वती नाम्ना चोपासना विधीयते । तत्र च यथा परब्रह्मणि सच्चिदानन्दविग्रहे सदंशस्य चिदंशेन सह नास्ति भेदः, तथैवात्रापि कालीविद्यायाः तारा-विद्यायाश्च नास्ति भेदः । चण्डाकरालिकायाः श्रीविद्यायाश्च तुरीयावस्थायां वैषम्यामावात् तयोरप्यभेदः प्रतिपाद्यते । अत एव सर्वत्र श्रीः श्रीस्वरूपेण विराजते, सा च पचदशीविद्या त्रिपुरानाम्ना, षोडशी विद्या महात्रिपुरानाम्नाऽभिधीयते । सा च अन्तर्बहिर्भेदेन समष्टिव्यष्टितया यदा स्वात्मानं स्वात्मना विलोकयति, तदा चक्राकारेण देव्यो मन्त्राश्च प्रभवन्ति, तदा एव जगतो विस्ताराश्च सम्भवति । अन्तर्लीनविमर्शे तु स्वकीयाऽवस्थाने महाबैन्दवचक्रमधिशेते इयमेव योगीनामुन्मनाऽवस्था । तदा ब्रह्माण्डादिकटाहान्तं सर्वं जगत् बिन्दुरूपेणावस्थित भवति । अत एव वदन्ति शंकराचार्याः-

"तनीयांसं पांशुं तव चरणपङ्केरुहभवम् ।
विरिञ्चिः संचिन्वन् विरचयति लोकानविकलम् ।।
वहत्येनं शौरी कथमपि सहस्रेण शिरसा ।
हरः सक्षुच्छ्यैनं भजति भसितोद्धूलनविधिम् ।।

इति सौन्दर्यलहर्यामित्यलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"का संस्कृता संस्कृतिः"

ले– लोकनाथ आचार्यः
पशुपति–देवपत्तनम्
काष्ठमण्डपः

या शान्तिं सुकृतिं प्रयच्छति शुभा या विश्ववन्द्याऽधुना–
या माता सकलान् सजीवयति या कल्याण-मूर्तिर्हि सा ।
निद्रां रे ! त्यजतेति घोषयति या लोके प्रसिद्धिं गता-
सभ्येभ्यः सुखदा जयन्ति मुनयः का संस्कृताः संस्कृतिः ।।
।।१।।

पितॄन् मानय मातरं प्रतिदिनं पूजादिभिस्तुष्टय-
सत्कार्याः सकलास्त्वयाऽतिथिजना देवस्वरूपाश्च याः ।
रक्षध्वं स्वजनिं धरां च सुरतां सन्दर्शयध्वं मुदा
इत्थं घोषयिनीममुं भजत रे ! का संस्कृता संस्कृतिः ।।
।।२।।

संस्कारैर्विविधैर्लिपेः सफलतां प्राप्नोति सर्वैर्गुणैः
बालः सद्य-निसर्ग-नम्र भविता नीचैर्भवत्येव यः ।
शुश्रूषा श्रवणं समग्र-ग्रहणं चोहार्थ-ज्ञानं च यत्-
सर्वेषां सदनं शिशोर्मतिरसौ का संस्कृता संस्कृतिः ? ।।
।।३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वातन्त्र्यं, स्वजनः, स्वकीय-वसनं स्वस्यैव भोज्यादिकम्-
भाषा, राष्ट्रिय-भावना च विमला आसन् पुरा तेऽधुना ।
अस्माकं सुतरां पुरातनतमा सा वैदिकी संस्कृतिः
आमूलं विपदं गता ! नु विदुषः का संस्कृता संस्कृतिः ? ॥
॥४॥

विप्राणाममलं ललाटपटलं शून्यं दरीदृश्यते-
सर्वे मुण्डित-मध्यमाश्च विशिखा हिन्दोः स्वधर्मोऽपि किम् ? ।
दुःखं स्वानुभवं विचार्य पथिकस्त्यक्त्वा क्व यातः स्वयं,
धिक्! धिक् ! हिन्दु-पदेन भूषित-जनान् का संस्कृता संस्कृतिः ॥
॥५॥

गणिकागर्भसम्भवो वशिष्ठश्च महामुनिः ।
तपसा ब्राह्मणो जातः संस्कारस्तत्र कारणम् ॥
– भविष्य पु: १।२।४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णप्रसादं प्रति

मनोजकुमार आचार्यः

पूर्णप्रसादः सुधियां प्रशस्यो, विद्यानुरागी च कुलीनसूरिः
साहित्यभाषासुचयो विशारदः, सत्यप्रियो धन्यः सुहृज्जनः कविः।
॥१॥

आचारनिष्ठो विनयी प्रबुद्धो, नेपालदेशस्य महाविभूतिः
दृढप्रतिज्ञः सरसः पटुश्च, पूर्णप्रसादो विदुषां वरिष्ठः ॥
॥२॥

गोरक्षदेशस्तव जन्मनाऽभूद् धन्यो वदान्यो बहुभिः प्रशस्यः
पश्चाच्च जातः सकलोऽपि देशः सुकर्मणाऽभूद् बहुभिः प्रशस्यः॥
॥३॥

अन्यायदुर्नैतिकदुर्व्यवस्था विरूद्ध सन्मार्ग प्रदर्शको ह्यः
गीर्वाणवाण्याः प्रचुरप्रसारणे भाषाविकासेऽपि सदा समर्पितः ॥
॥४॥

स्वकर्मनिष्ठेन निजाश्रितेन पौरस्त्यसंस्कारसुसंस्कृतेन
स्वजन्मना भूमिरियमलङ्कृता पूर्णीकृता पूर्णपदे च प्रापिताः ॥
॥५॥

स्वल्पे हि काले सकलाविशिष्टा गुणाऽग्रणीकीर्तिस्त्वयैव लब्धा
हाहन्त! दुर्दैव विधातकेन, जातं विलीनमधुना शरीरम् ॥
॥६॥

द्वात्रिंशके ज्येष्ठगते च मासे, विहायभूम्या वसतिं दिवङ्गतः
छात्राश्च सर्वे तव कामयन्ते दीर्घां सुशान्तिं सुगतिं च नित्यम् ॥
॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मम उद्यानम्

-अनन्त आचार्यः
सं. मा. वि. क. ९

मम उद्यानं मम उद्यानं पश्यत सर्वे मम उद्यानम्
हरितलताभिर्हरितैर्वृक्षैः शोभितमेतन्मम उद्यानम् ।
स्वेतैः कुसुमैः रक्तैः कुसुमैर्भूषितमेतन्मम उद्यानम्
विविधविहङ्गमवासितशब्दैर्गुञ्जितमेतन्मम उद्यानम् ।।

शिल्पिविनिर्मितजलधाराभिः सिञ्चितमेतन्मम उद्यानम्
रङ्गविरङ्गैर्विविधैर्मत्स्यैः क्रीडितमेतन्मम उद्यानम् ।
विद्युद्दीपैर्विविधाकारैरूज्ज्वलीभूतं मम उद्यानम्
क्रीडनकैरपि तिर्यक्संस्थैः खेलितबालैर्मम उद्यानम् ।।

श्रमनिर्वारैश्छत्राकारैर्मण्डितमेतन्मम उद्यानम्
रत्नप्रतिमं भुवि चा प्रतिमं पश्यत सर्वे मम उद्यानम् ।
मम उद्यानं मम उद्यानं पश्यत सर्वे मम उद्यानम्
मम उद्यानं मम उद्यानं पश्यत सर्वे मम उद्यानम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यादिग्रहाणां यन्त्रनिर्माणविधिः

-लक्ष्मीकान्तः पन्थी

यन्त्रं ज्ञेयमथो बुधैः सुखकरं
सूर्यादिकानां क्रमात्
पश्चाद्यास्त्रिहता भवन्ति सफला-
स्तेषां हि संख्यास्ततः ।।

इष्टाङ्क त्रिहृतं विधाय विदुषा
रक्ष्यं हि तन्मध्यमे
तत्रैकं विनियोज्य देहि प्रथमे
हित्वा पुनश्चान्तिमे ।।१।।

द्वौ संयोज्य वियोज्य रक्ष क्रमश-
स्तुर्ये तथा षष्ठके
त्रीन् संयोज्य वियोज्य तत्पुनरपि
स्थाप्यं तृतीये नगे ।।

वेदाँस्तत्र नियोज्य तद् वसुगृहे
हित्वा पुनर्लोचने
देयं तन्नवकोष्ठकेन सहितं
यन्त्रं सुपूर्णं भवेत् ।।२।।

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यशास्त्राणां
नामकरणपरम्परा

-जीवन अधिकारी

काव्यसौन्दर्यविवेचको ग्रन्थः काव्यशास्त्रमिति अधुना सर्वैः काव्यविवेचकैः स्वीकृतमस्ति । परन्तु काव्यतत्त्वविमर्शस्य प्रारम्भिकसमये काव्यस्य शब्दसौन्दर्यस्य तत्त्वतः पर्यालोचनपूर्वकं रचितस्य ग्रन्थस्य कृते 'काव्यालङ्कारः' इति नाम प्रमुखतया प्रयुज्यते स्मेति काव्यशास्त्रेतिहासाध्ययनेन ज्ञायते । काव्यतत्त्वविमर्शनस्य उषाकाले रचितानां सर्वेषामपि ग्रन्थानां नामानि 'काव्यलङ्कारः' इति प्रदेनैवोट्टङ्कितानि, इत्यपि इतिहासाध्ययनात् स्पष्टीभवति । काव्यशास्त्रपरम्परायामादिग्रन्थ रूपेणाद्यापि प्रथितो भामहस्य कारिकासूपनिबद्धो ग्रन्थोऽपि काव्यालङ्कारनाम्ना एव प्रसिद्धो वर्तते ।

भामहस्य प्रयोगानुसरणं कृत्वा तदनन्तरवर्तिभिः, उद्भट-रुद्रट वामनादिभिरपि स्वरचितानां ग्रन्थानां नामानि काव्यालङ्कारशब्देनैव कृतानि । तेषु आचार्येषु वामनेन स्वविरचिते काव्यालङ्कारनामके ग्रन्थे "सौन्दर्यमलङ्कारः" इति सूत्रं लिखित्वा अलङ्कारशब्दस्य काव्येषु प्रयुक्तं शब्दार्थसौष्ठवत्वमिति गूढं रहस्यं प्रतिपादितम् । अलङ्कारशब्दालक्षितं शब्दार्थसौन्दर्यं 'काव्यालङ्कारः' इति नामकरणे उपर्युक्तमेवेति मत्वा पश्चाद्वर्तिभिरन्यैरपि आचार्यैः काव्यस्य सौन्दर्याधायस्य धर्मस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलङ्कारनाम्ना व्यवहृतम् । इत्थं काव्यशास्त्रपरम्परायां तादृशानां ग्रन्थानां कृते काव्यालङ्कारशब्दस्य व्यवहार एवाधिक्यतया प्रचलितः ।

पूर्वोक्तरीत्या काव्यालङ्कारस्यार्थः काव्यसौन्दर्यं, ततः शब्दशक्ति-महिम्ना काव्येष्वलङ्कारादीनां विवेचनपूर्वकं रचितस्य काव्यशास्त्रस्य ग्रहणमिति च फलति । अत एव काव्यसौन्दर्यपरीक्षार्थमाधारभूतानि काव्यस्य तत्त्वानि मौलिकानि सिद्धान्तानि च यत्र प्रतिपादितानि तानि सर्वाणि शास्त्राणि काव्यालङ्कारनाम्ना प्रथितान्यभवन् । एतादृशेषु शास्त्रेषु केवलमलङ्काराणामेव विवेचनं न भवति अपि तु काव्यसौन्दर्य-परीक्षायामुपयोगीभूतानां गुण-दोष-रीत्यादीनां तत्त्वानां च विमर्शनं भवति । अतः काव्यशास्त्रस्य नामकरणप्रसङ्गे, प्रयुक्तस्याऽलङ्कारशब्दस्य सौन्दर्यपरकत्वे स्वीकृते काव्यसौन्दर्यप्रतिपादकानां शास्त्राणां काव्यालङ्कार इति नाम उचितमिव प्रतिभाति ।

यद्यपि इदृशेषु शास्त्रेषु रस गुण-दोष-रीत्यादीनां विवेचनं प्राप्यते, तथापि छत्रिन्यायेन अलङ्कारशब्दस्य प्राधान्यमुररीकृत्य 'अलङ्कारशास्त्रम्' इमि नाम्नः प्रयोगमपि प्रचलितं दृश्यते । परमस्य शब्दस्य प्रयोगो-ऽधिकतया न प्राप्यते ।

तदनन्तरं काव्यसौन्दर्यविवेचकानां ग्रन्थानां विकासार्थं तेषां गौरव-वृद्धयर्थं च काव्यशब्देन सह शास्त्रशब्दं संयोजयित्वा नामकरणप्रयोगः प्रादुर्भूतः । 'शासनात् शास्त्रम्' इति व्युत्पत्त्या यस्मात्कस्मिन्नपि कार्ये प्रवृत्त्यर्थं, तथा च यस्मात्कस्मादपि कार्यान्निवृत्त्यर्थं, यन्निर्दिशस्तच्छास्त्रम् इति सामान्यार्थो निष्पद्यते । प्रवृत्तिनिवृत्तिरूपं निर्देशनं वेद-स्मृतिधर्मशास्त्रादिषु प्राप्यते अतस्तेषां शास्त्रत्वम् । परन्तु काव्यस्य प्रवृत्तिनिवृत्तिरूपं शासनमेव न प्रयोजनम् । काव्येषु कर्तव्यताऽकर्तव्यतोपदेशस्य गौणस्य, अपितु रसास्वादनम्, अलौकिकानन्दप्रवाहे मज्जनमथवा सद्यः परनिर्वृत्तिः, इति प्रयोजनस्य प्राधान्यम् । अतः प्रभुशब्दसम्बद्धवेदादिशास्त्रेभ्यः काव्यस्य पृथक्ता दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैव वेदान्तशास्त्रेऽपराप्येका' शंसनात् शास्त्रमिति व्युत्पत्तिर्लभ्यते अनया 'कस्यापि गूढतत्त्वस्य यत् शंसनं--प्रतिपादनं तच्छास्त्रम्' इत्यर्थो लभ्यते । अतिगूढरूपस्य ब्रह्मतत्त्वस्य प्रतिपादकानां वेदान्तादीनां शास्त्रत्वप्रदानार्थैव तत्र (वेदान्ते) अस्या व्युत्पत्त्याः प्रयोगः काव्येऽपि रसादीनां न दृश्यते कुत्रापि वाच्यायमानता । किन्तु तत्र तेषां गूढता एव स्वीकृता। अतः काव्ये रसादीनां गूढानां तत्त्वानां प्रयोग· कीदृश , इति विषयमधिकृत्य विमर्शनपूर्वकं रचिताः सर्वे ग्रन्थाः काव्यशास्त्रनाम्ना प्रथिताः । शंसनाच्छास्त्रमिति व्युत्पत्तिमङ्गीकृत्यैव तेषां शास्त्रत्वमिति युक्तमेव ।

एकादशशतके प्रादुर्भूतो भोजदेवः स्वविरचिते सरस्वतीकण्ठाभरणनामके ग्रन्थे केवल विधिप्रतिषेधरूपं प्रयोजनमधिकृत्य काव्यशास्त्रशब्दस्य प्रयोगमकरोत् । परं रसास्वादनमेव काव्यस्य प्रयोजनमिति विषये बहूनां विदुषां दृश्यत ऐकमत्यम् । इदमेव तत्त्वं काव्यस्य वेदादिशास्त्रेभ्यः पृथकतां प्रकटयति । अन्यथा तेभ्यः काव्यस्य का पृथक्ता ? काव्यस्यात्मतत्त्वरूपेण स्वीकृतस्य रसस्य सरक्षणार्थं, गौरववृद्धयर्थञ्च शसनाच्छास्त्रमिति व्युत्पत्तिः काव्यशास्त्रशब्दस्य प्रयोगे अनुसर्तव्या एव । अतो विद्वांस 'शासनाच्छास्त्रम्' इति व्युत्पत्तिं गृहीत्वा काव्यशास्त्रशब्दस्य प्रयोगं कुर्वता भोजदेवेन काव्यशास्त्र प्रति सर्वथाऽन्यायः कृत इति मन्यन्ते ।

तदनु काव्यशास्त्रशब्दस्य स्थाने साहित्यशास्त्रमिति शब्दस्य प्रयोगः प्रचलितः । 'शब्दार्थौ सहितौ काव्यम्' इत्युक्तवता भामहमहोदयेन शब्दार्थयोः साहित्यमेव काव्यमिति प्रतिपादितं प्रकारान्तरेण । दशमशतके कुन्तकमहोदयेन साहित्यशब्दस्याभिप्रायमित्थ मुल्लिखितं प्राप्यते –

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ।। इति ।।

अर्थात् काव्यशोन्दर्यवृद्धयर्थं शब्दस्य अर्थस्य च अन्यूनामतिरिक्तत्वमनोहारिव्यवस्थितेरत्यावश्यकता वर्तते । अतः कस्यामपि वर्णनपरम्परायां शब्दस्य अर्थस्य च नन्यूना नाधिका च सहृदयहृदयाकर्षणकारी विच्छित्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्यते,तत् साहित्यमिति काव्ये शब्दवैचित्र्यानुसारमेवार्थवैचित्र्यस्यापि समता निश्चितता, अन्यथा न शब्दार्थयोः साहित्यता, न च काव्यमेव साहित्यम् यत्र यत्र अर्थगौरवानुकूलं शब्दप्रयोगकौशलं तथा च शब्दसौन्दर्यानुरूप अर्थगौरवत्वं तत्र तत्रैव साहित्यत्वं नाऽन्यत्र । अत एव शब्दार्थयोरन्यूना न चाधिका शब्दार्थसौन्दर्यवर्णनपरम्परा एव साहित्यमिति निश्चितम् । क्रियते साहित्यपूर्णकाव्यमिति विवेचनावसरे रसादीना गूढतत्त्वानां शब्दार्थसौन्दर्यस्य चान्वेषणं क्रियते । इदमेव तथ्यं (स्वीकृत्य) युक्तियुक्तं मत्वा चतुर्दशशतके विश्वनाथमहाभागेन दर्पणशब्द योजयित्वा साहित्यदर्पण , इति स्वशास्त्रस्य नाम कृतम् । एतत्पूर्वं काव्यशास्त्रस्य कृते साहित्यशास्त्रस्य प्रयोगो न दृश्यते । अतः साहित्यशब्दस्य विश्वनाथ एव प्रथम प्रयोक्ता इति केषांचिन्मतम् । परं विदुषामस्त्येवतद्विषये विसम्वादः ।

आचार्यस्य विश्वनाथस्य प्रयोगानुसरणं कृत्वा राजशेखर 'काव्यमीमांसा' इत्याख्यं काव्यशास्त्रं विरचट्य 'पञ्चमी साहित्यविद्या' इति तथ्यं प्रमुखतया प्रतिपादयति । अतः काव्यमीमांसा इत्यस्य 'साहित्यविद्या' इति नामान्तर च कल्प्यते विद्वद्भिः । रूपकस्यापि साहित्यमीमांसा इत्याख्यो ग्रन्थो विद्यते । इत्थं साहित्यशास्त्रस्य प्रयोगः काव्यशास्त्रस्य कृते प्रचलितः ।

केवलमेतावता एव नामकरणप्रक्रिया न समाप्ता । अनन्तरं 'काव्यसौन्दर्यविवेचकस्य ग्रन्थस्य कृतेऽयदेकं नाम प्रचलितमासीत्, तच्च क्रियाकल्पमिति । केषांश्चिन्मते इदं नाम सर्वेभ्योऽपि अन्येभ्यो नामेभ्यः प्राचीनतमम् इति । वात्स्यायनस्य कामशास्त्रे परिगणितासु चतुःषष्टिकलासु क्रियाकल्पशब्दस्य प्रयोगो लभ्यते । तत्र केवलं कलापरकत्वमेव दृश्यतेऽस्यार्थ ; परं काव्यशास्त्रे काव्यतत्वविमर्शनकलारूपे परिणमति । क्रियाकल्पशब्दः काव्यक्रियाकल्पशब्दस्य संक्षिप्तस्वरूप एव प्रतिभाति । अतः काव्यकलासौन्दर्यपरीक्षणार्थं प्रतिपादितानां तत्त्वानां विवेचनात् क्रियाकल्पशब्दोऽपि व्यवहारयोग्यो दृश्यते। 'क्रियाकल्प' इति काव्यकरणविधिः काव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लङ्कार इत्यर्थः, इति ललितविस्तरनामके बौद्धग्रन्थे प्राप्यते । रामायणस्यो-त्तरकाण्डे रामस्य सभाया लवकुशयोर्गानश्रवणार्थमुपस्थितानां वैय्याकरण-स्वरगान्धर्व विद्याविशेषज्ञानां मध्ये काव्यविदां क्रियाकल्पविदां च उपस्थितिर्वर्णिता प्राप्यते । अस्मात् सभायां केवलं रसज्ञा एव जना नागता अपितु काव्यसौन्दर्यपरीक्षणसमर्थाऽपि तत्रोपस्थिता आसन् इति स्फुटीभवति। उल्लिखितञ्च रामायणे-

'क्रियाकल्पविदश्चैव तथा काव्यविदो जनान्' इति ।

इत्थं काव्यसौन्दर्यविवेचकग्रन्थस्य कृते काव्यालङ्कारः, काव्यशास्त्रम् अलङ्कारशास्त्रं, साहित्यशास्त्रं, क्रियाकल्पः, इति पञ्चनामानि दत्तानि । वामहोद्भट-रुद्रट-वामन-कुन्तकैः, 'काव्यलङ्कारः' शब्द एवाधिकरुचिपूर्वकं प्रयुक्तम् । वक्रोक्तिजीवितस्य कारिकाभागस्य कृते काव्यालङ्कारः, शब्दस्य प्रयोगः कुन्तकाय रोचते । प्रारम्भे काव्यालङ्कारशब्दस्य प्रयोग एवाधिकतया सञ्जात, पश्चात्तु साहित्यवार्यै स्वेच्छानुसारं साहित्यशास्त्र-काव्यादर्श-काव्यमीमांसा-साहित्यदर्पणादीनि नामानि प्रदत्तानि । मम्मटस्य कृते 'काव्यप्रकाशः' शब्द एव रुचिकरो जातः । प्रकाशशब्दस्य प्रयोगात् काव्यस्य सौन्दर्यविवेचने उपयोगिभूतानां रसादितत्त्वानां विवेचनं शक्त्यनुसारं प्रकाशयति ग्रन्थकारः / अतः काव्यशब्देन सह प्रकाशशब्दस्य प्रयोगोऽपि सङ्गतिपूर्ण एव प्रतिभाति । एवमुपरि उक्ताभिः नामभिरेवाऽद्यावधि काव्याशास्त्राणि प्रवर्तितानि सन्ति, इति । शम् ॥

— सन्दर्भग्रन्थः-काव्यप्रकाशः-

— टीकाकारः—आचार्यो विश्वेश्वरः

अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
अजापुत्रं बलिं दद्याद्दैवो दुर्बलघातकः ।

— सुभाषित—रत्न—भाण्डागारात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वन्महिमा

– शिवहरिः लामिछाने 'अभागी'
उत्तरमध्यमायाः द्वितीयो वर्षः
वाल्मीकिविद्यापीठम्

वेत्तीति विग्रहाद् विद्धातोर्निष्पन्नोऽयं विद्वान् शब्दः। जगत्यस्मिन् विविधवस्तूनि. वर्णयितुं शक्यन्ते परन्तु विदुषां विद्वत्तां प्रशंसयितुं समर्था न भवन्ति चेन्मादृशानां तु का कथा? यद्यप्यहं तत्कर्तुं यदि गच्छामि निश्चयमुपहास्यस्पदो भवामि। तथापि विदुषां वर्णनविधौ तेषामनुकम्पया ममापि मन्दबुद्धेरन्तः स्थिता भारती उदेतीति कृत्वाऽधुना किञ्चिल्लिखितुं संलग्नोऽस्मि।

"स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते" इत्युक्तेः सारतामादाय विद्वान् स्वदेशं परित्यज्य यदि विदेशमपि गच्छति तदापि प्रशसनीयो भवति इति स्पष्टम्। विद्वन्महिमा संसारेऽस्मिन् यत्र तत्रापि श्रोतुं शक्यते इति कृत्वा विद्वज्जीवनमेव वास्तव-जीवनं इत्यहं मन्ये। परन्तु मादृशानां पृथ्वीभारभूतानां जनानां जीवनन्तु निरर्थकमेव। यथा पूर्णिमायां पूर्णिचन्द्रो निजप्रभाभिः सुधा प्रददाति, जनाह्लादयति तथैव विदुषां कलाकलापकौशल-युक्तानां विविधग्रन्थानां श्रवनपठनाभ्यां सांसारिकाणां जनानां कृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपरमेवोद्भुत संसारः प्राप्त इव प्रतिभाति । ज्ञानपिपासूनां जनानां विद्वज्जनमनोहारितया नवीनसंसारमुदेति । संसारेऽस्मिन् सार्थकतया जीवनाद् विद्वज्जनजीवनमेव सफलं जीवनम्, यतः सकलपृथ्वीभारो विद्वच्छक्तेः स्कन्धयोरेव स्थापितः । मातृभूमिरपि तादृशजनानामेवापेक्षां करोति । कर्तव्या-कर्तव्ययोरज्ञानात् पशुवदाचारभूतानां जनानां तु का कथा ? परन्तु लोकेऽस्मिन् ज्ञानविलासिजनानां कृते विदुषां विद्वत्ता एव अविस्मरणीया जायते ।

"एकश्चन्द्रस्तमो हन्ति न तु तारा शतानि च" इत्युक्त्या वयं जानीमो यत् सहस्रकोटिसंख्यका मूर्खजना एकत्रोपस्थिता अपि अज्ञानान्धकारमपनेतुमसमर्था भवन्ति किन्तु विद्वान् एकाकी एव अज्ञानान्धकारं दूरीकृत्य ज्ञानप्रकाशेन समस्तं जगत् जाज्वल्यमान विदधाति । जन यादृशैः सह सङ्गतिं करोति तादृश एव भवति । यथोक्तमपि "यथा वृक्षस्तथा फलम् ।" तस्मात् विद्वत्पदमनुविधेयम् । मृत्युरपि विद्वज्जनस्य वास्तविकं जीवननापनेतुं क्षमः । जगत्यां सुरदनुजमर्त्या अतिबला भस्मीभूताः परन्तु विद्वन्महिमा न कदापि विनष्टा यतो हि ते स्वलिखित ग्रन्थमाध्यमेन अनन्तकालपर्यन्तमन्धकारग्रस्तं जगत्प्रकाशयन्ति । यथा स्वराष्ट्राय गत जीवितो वीरोऽमरस्तथा विद्वान् ।

यावच्च सुधाकर-दिवाकरौ यावच्च शोदसी विराजतेऽस्मिन् जगति तावदिहलोके विद्वान् सादरं विराजते इति निस्सन्देहं वक्तुं शक्यते ।

जयतु संस्कृतम् !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टेलिभिजनम्

– विष्णुराज आत्रेयः

"टेलिभिजनम्" अधुनातने युगे संचारस्य द्रुततरं माध्यमम् । अनेन विश्वस्य सुदूरे स्थिता अपि देशाःसमीपे स्थिता इव प्रतीयन्ते। कदाचित् "यत्र विश्व भवत्येक....." प्रमाणयन्त इव ।

'टेलिभिजन' इत्यत्र शब्दद्वयमस्ति । एकः टेलि (Teli) इति । अपरो भिजन (Vision) इति । अनयोः 'टेलि' इति ग्रैकः शब्दः । अस्यार्थः "दूरम्" इति । 'भिजन' इति दर्शनार्थकात् ल्याटिनिकाद् भिज् (Vis) धातोर्ल्युडर्थके (ion) प्रत्यये क्रियमाणे निष्पद्यते । 'भिजन' इति संस्कृते 'वीक्षागम' इव ।

अत एव भारतेऽस्य पर्यायः 'दूरदर्शनम्' इति । 'बाङ्गलादेश'– प्रभृतिष्विदं रूपवाहिनीत्यादिपदैः व्यवह्रियते । नेपालस्त्वधुनाऽतिप्रसिद्धत्वात् सर्वविदितत्वाच्चास्य पर्यायो नान्विषति । अत एव च "संस्कृतम्" कार्यक्रमोऽपि 'टेलिभिजनम्' इत्येव प्रसार्यते ।

नेपालटेलिभिजनादपि 'संस्कृतम्' कार्यक्रमः प्रसार्यत इति श्रुत्वा संस्कृतानुरागिणः कस्य मनः न प्रसीदते । पूर्वं तु टेलिभिजनात् 'संस्कृतम्' इति श्रुत्वा जनसामान्यं विस्मयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदर्शयति स्म। संस्कृते किं प्रसार्यते ? कथं प्रसार्यते ? को बुध्यतिः ? कः स्मरति ? इति।

किन्तु संस्कृतानुरागिणां संस्थानां, प्राध्यापकानां, छात्र-बन्धूनां सहयोगेन सम्मत्या च यथाशक्यं कार्यक्रमान्निर्माय प्रदर्शितम्। अस्य प्रदर्शितस्याधुना सप्तमो मासः प्रचलति।

अयं कार्यक्रमः "संस्कृतम्" इति नाम्ना प्रतिपक्षं प्रसार्यते। प्रारम्भे प्रतिपक्षं द्वितीये चतुर्थे च सोमवासरे सायं प्रसार्यमाणोऽयं कार्यक्रमः। मासद्वयात् प्रभृति मंगलवासरे प्रसार्यते। अस्य प्रसारणावधिः प्रायो द्वादशक्षणात्मको भवति। एतदवधौ वन्दना, कविताः, बालगीतम्, नृत्यम्, भावनृत्यम् रूपकम्, संस्कृत-दैनन्दिनी (पाक्षिक-समाचारः) च प्रसार्यते। दैनन्दिन्यां संस्कृतसम्बन्धिनां, संस्कृतिसम्बन्धिना, धर्मसम्बन्धिनां विषयाणां प्रामुख्यं भवति।

इदमुत्साहास्पदं यदनेन संस्कृतं पाक्षिकेन अल्पीयसा कालेनैव बहूनां दर्शकानां अपरिमितः स्नेहो लब्धः। अस्य केचन आलोचका अपि भवेयुर्नाम इमेऽपि मार्गदर्शनाय त्रुटिपदि-ज्ञानाय सन्त्येव स्पृहणीयनः। अन्त्ये ये खलु अस्य नूतनाविष्कारस्य यान्त्रिकीं शिल्पसम्बन्धिनीं संघटनपक्षं च सम्यक् विदुस्तेषां सौमनस्येनैव एष कार्यक्रमः प्रतिपक्षं वृद्धिं यास्यति।

'संस्कृतम्' कार्यक्रमः सर्वेषां कार्यक्रमः। अतोऽत्र यथावसरं सर्वैरेव कार्यक्रमप्रदानेन वा निर्देशनेन वा सहयोगो विधेयः। 'सर्वारम्भास्तण्डुलप्रस्थमूला' "इति नीत्यनुसारं अर्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रधानेऽस्मिन् युगेऽर्थेन विना किमपि भवितुं नार्हति, इति। नास्ति तिरोहित केषामपि। आशास्यते विषयेऽस्मिन् वदान्यसी सहयोगो यथा समयं..... विलम्बेन वा लप्स्यत एव। संस्कृतं भवतु भूतये सदा इत्यलम्।

। इति ।

अकुलीनोऽपि मूर्खोऽपि भूपालं योऽत्र सेवते
अपि संमानहीनोऽपि स सर्वत्रापि पूज्यते ।।

– सुभाषित–रत्न–भाण्डागारात्

□ □ □

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।

– श्रीमद्भागवद्गीता २।४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(बालहितोपदेशः)

राज्ञः सुदर्शनस्य कथा

—प्रमोदवर्धनः कौण्डिन्न्यायनः

अस्ति गङ्गायाः दक्षिणे तीरे पाटलिपुत्रनामकं नगरम्। तत्र अभूत् सुदर्शनो नाम कश्चिद् बुद्धिमान् राजा बभूव। स राजा एकदा कस्यापि मुखात् शास्त्रज्ञानरहितानां यौवनेन धनेन प्रभुत्वेन अविवेकेन च सहितानाम् पुरुषाणान् निन्दां सुश्राव।

ततश् च शास्त्रमपठितवतां स्वेच्छाचारिणामविनीतानामात्मनः पुत्राणाम् चरित्रं स्मृत्वा स राजा विचारयामास— "यथा स्फुटितेन अक्षेण केवलम् पीडा एव भवति, कोऽपि लाभो न भवति, तथैव मूर्खेण अधार्मिकेण च पुत्रेण स्वकुलस्य दूषणमेव भवति, न कोऽपि लाभः। तस्मात् मया पुत्रा अवश्यं शिक्षणीयाः। किन्तु कथमेते शिक्षणीयाः? अहं स्वयं शिक्षयितुं सम्यङ् नैव जाने। राज्यकर्मणि संलग्नस्य मम शिक्षणाय समयोऽपि पर्याप्तो नास्ति। पित्रा मात्रा वा पुत्रा केनाऽपि प्रकारेण अवश्यं शिक्षणीयाः। उद्योगेन, प्रयत्नेन, कर्मणा च अभीष्टानां विषयाणां सिद्धिर् भवति, केवल चिन्तनेन मनोरथेन च किमपि सिद्धन् न भवति, नियतिरपि फलदानाय पौरुषमपेक्षते। तस्माद् एतस्मिन् विषये यथाशक्ति प्रयत्नं कुर्वे; तदिदानीम् पुत्राणां शिक्षणस्य व्यवस्थाङ् कर्तुम् एकाम् पण्डितसभाङ् कृत्वा विचारङ् कुर्वे" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततश् च स राजा पण्डितसभाम् कृत्वा बभाण–"भो भोः पण्डिताः, शृण्वन्तु भवन्तः, अस्ति भवत्सु मध्ये काश्चिदेवम् भूतो विद्वान् यो मम पुत्त्रान् सुखकरतया सरलतया च नीतिशास्त्रोपदेशेन नीतिशास्त्रज्ञान् विनीतान् सन्मार्गगामिणश् च कर्तुं समर्थः ?" इति ।

आदित् तस्यां सभायां समवेतो सकलनीतिशास्त्रतत्त्वज्ञो विष्णुशर्मा नाम कश्चन महापण्डित उवाच "देव, महाकुले जाता एते राजकुमाराः. तस्माद् एते सुखेनैव नीतिशास्त्रम् पाठयितुं शक्यन्ते । अहं षण्णाम् मासानामभ्यन्तर एव एतान् नीतिशास्त्रज्ञान्, विनीतान्, सन्मार्गगामिणश् च कर्तुं शक्नोमि" इति ।

ततोऽतीव प्रसन्नो भूत्वा स राजा तस्य महापण्डितस्य विष्णुशर्मण उच्चं सम्मानञ् कृत्वा नीतिशास्त्रोपदेशाय तस्मै स्वपुत्त्रान् समपयामास ।

क्रमशः .....

(हितोपदेशस्य प्रस्ताविकात उद्धृत्य सङ्क्षिप्तीकृत्य सरलीकृत्य, परिष्कृत्य च प्रस्तुता)

त्रियंकदेशबोधीनि शास्त्राण्यन्यानि सन्ति हि ।
सर्वोपजीवकं लोकस्थितिकृत् नीतिशास्त्रकम् ।।
सर्वलोकव्यवहृतिस्थितिर् नीत्या विना न हि ।
सर्वाभीष्टकरं नीतिशास्त्रं स्यात् सर्वसम्मतम् ।।

– शुक्रनीतेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादकीयम्

सीमितसाधनेनाल्पबुद्धिना च जायमानोऽयं पत्रिकाप्रकाशनार्थमस्माकं प्रयासः ।

सर्वदोषशून्यत्वात् सार्वत्रिकत्वाच्च संस्कृतभाषा न कस्यापि वर्गविशेषस्य सम्पत्तिरपि तु लोकभाषेति ज्ञात्वापि वयमस्योन्नतये विकासार्थञ्च स्वार्थं विहाय नैव प्रयतरताः स्मः । इत्थं विचिन्त्य वाल्मीकिविद्यापीठच्छात्रसंघेन स्वस्यान्यकार्यक्रमवत् संस्कृतभाषायाः प्रचारार्थं जनसमक्ष आनेतुञ्चास्मिन् क्षेत्रे संलग्नानां सर्वेषां समादरणीयानां महाभागानां प्रेरणार्थं यथापूर्वमङ्कोऽयमपि प्रकाशितः ।

आस्मिन्नेव प्रसङ्गे संस्कृतक्षेत्रस्योज्ज्वलदीपकस्य, क्रान्तिचेतसः, युगप्रभावोत्पादकस्य चास्माकं मान्यवरस्य गुरोः "पूर्णप्रसादब्राह्मणस्य" निधनेन वयं शोकाकुलाश्चिन्ताऽऽक्रान्ताः स्म एवञ्चैतेन सस्कृतक्षेत्रऽप्यपूरणीया क्षतिरस्माभिरयनुभूयते । मृत्तस्यानदुर्घटनायाः प्रभावेण दिवङ्गतस्यास्माकं सख्युरच्यूतप्रसाद गौतमस्य वियोगेन च शोकसंविग्दमानसा वयं किंकर्तव्यविमूढाः स्मः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९

विद्यालयान्तर्गततयैकोऽच्युतप्रसादगौतमपत्रकारितापुरस्कारश्च संस्थापितम् । संस्कृतशिक्षाया निरन्तरप्रगतिं स्वपुत्रस्यामरत्वञ्च कामयमानः श्रीसिद्धिनाथगौतमः सर्वथा धन्यवादार्हश्च । छात्रसङ्घ एतस्योत्कृष्टकार्यस्य कृते तं प्रति साधुवादं व्यनक्ति ।

।। अस्तु ।।

– स्वतन्त्र–विद्यार्थी–संघः
वाल्मीकिविद्यापीठम् ।

प्रस्तोता– जीवन अधिकारी,
वाल्मीकिविद्यापीठम् ।

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः

– नैषधीयचरिते

☐ ☐ ☐

जातेति कन्या महती हि चिन्ता कस्मै प्रदेयेति महान्वितर्कः ।
दत्ता सुखं यास्यति वा न वेति कन्यापितृत्वं खलु नाम कष्टकम् ।।

– सुभाषित–रत्न–भाण्डागारात्

१८८८०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu